श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरङ्गराज सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरङ्गराज सुप्रभातम् ॥

श्रीरङ्गभूमितलभूसुरदेशिकेन्द्रैः
  श्रीरङ्गवाटमिदमित्युदितैः प्रबोधैः।
श्रीभूमिपाणिकमलैश्च समाश्रिताङ्घ्रे
  श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ 1 ॥

कस्तूरिकाकलिकया कलितालकस्य
  कन्दर्पकोटिसदृशस्य कृपाम्बुराशेः।
कल्याणभूमिधर काङ्क्षितधैर्यसिन्धो
  श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ 2 ॥

लीलाविशेषललितालिलितेन्दिरायाः
  मालाकवेरतनया मणिरेव साक्षात्।
श्रीरङ्गराडिति जना निगदन्ति सर्वे
  श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ 3 ॥

जम्बूद्रुमादिवसतेः शशिराजमौलेः
  संभूतनिर्झरनदीहतकल्मषस्य।
उद्दीपनं वितनुते तव पादसेवा
  श्रीरङ्गराज विजयिन् तव सुप्रभातम् ॥ 4 ॥

श्रीरङ्गराजभवने भुवनैकमान्ये
  सीताकराम्बुरुहसेव्यतयातिधन्ये।

याने विमानशयने वरवेदशृङ्गे
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ **5**॥

श्रीचन्द्रपुष्करिणिकासरसःप्रतीरे
श्रीवृक्षमूल कमलाक्ष कटाक्षपूरे।
श्रीसह्यजावरविभूषण दिव्यमूर्ते
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ **6**॥

सूर्येन्दुमण्डलमृगेन्द्रसुपर्णशेष -
वालाभिवर्यगजवाजिरथप्रधानैः।
दिव्यैर्विमानशयने दययात्तनाथ
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ **7**॥

लक्ष्मीश केशव हरे नृहरे मुरारे
शौरे रमारमण कारण दीनबन्धो।
इत्यादरेण वदतामिह वाञ्छितार्थ
श्रीरङ्गराज जगदीश्वर सुप्रभातम्॥ **8**॥

श्रीसुप्रभातविनुतं सुकृताभिधेयं
प्रातस्समाहितमतिर्य इदं पठेत्तु।
तस्मै भुजङ्गशयनो भुवि रङ्गनाथः
सर्वाणि वाञ्छितफलानि सदा प्रसूते॥ **9**॥

॥ इति श्रीरङ्गराज सुप्रभातं समाप्तम्॥